वि
४६
३८४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

ब्राह्मणसर्वस्वं ।

श्रीकैवल्यधाम निवासि श्रीमत्परमहंस परिव्राजकाचार्य कृष्णानंदसरस्वती स्वामिप्रणीतं ।

श्रीमदित्यानेक विरुदावली विराजमान श्रीरामभिश्रशास्त्रि प्रणीततुर्यामांसापरामर्शसमुद्भूतं जातिब्राह्मणेभ्यो निवेदितं क्षत्रियादिभ्योपिचिरंनंदतु वर्णविभाग इतिशम

एतत्पुस्तक मुद्रणावसरे रा० नेनोपाह्व अण्णासाहेब शर्मणा गंगा प्रेसाधिप पुस्तक मपहारितं अधुना मुद्रिकामपि दास्ये दास इत्येव ब्रूते तस्या भिप्रायं सएववेद ।

श्रीकाश्यां ।

हिचिन्तक यन्त्रालये मुद्रितं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

अथ ब्राह्मणसर्वस्व प्रारम्भः ।

श्रीः ॥ जयसच्चिदानंद ॥ जयगोविंद ॥ श्री शंकरोराजराजोयद्राज्यमधुनापिहि ॥ वर्णाश्रमव्यवस्थायांदृश्यतेसकलैर्जनैः ॥ १ ॥ धृष्टहृष्टौहंसडिंभौ जघानयतिमंतुना ॥ सःस्मर्यतेधर्मगोप्ताश्रीकृष्णःखलशासनः ॥ २ ॥ नब्रह्मणापमानेषुश्रेयःपश्यंतिसाधवः ॥ तथापिचापमानायस्पृहाचेच्छमयंत्यपि॥ ३ ॥ पूर्वोत्तरविरोधेनस्वयंयद्व्याहतंवचः ॥ नतस्यखंडनैःकार्यंव्याहतिंतुप्रदर्शयेत् ॥ ४ ॥ मुद्रितायांतुरीयमीमांसायांमुखपृष्टेभाषाभेदेनाभिप्रायनिवेदनं तेभ्यस्तेभ्यःसंन्यासाधिकारोदत्त इतिध्वननाय ॥ उचितमेतदिति ॥ अथ श्रीमन्महा महोपाध्याय सत्संप्रदायाचार्य सर्वतंत्र स्वतंत्र पंडित स्वामिराम मिश्रशास्त्रि प्रणीत तुरीयाश्रममीमांसानिबंधो बहुभिरनेक देशस्थैः पंडितैः परिशीलितः स्यादुत्तराण्यपिदत्तानिस्युः॥ वयमधुनातं निबंधमत्या दराद्वितरितं परामृश्यस्थालीपुला कन्यायेन व्याहतिं प्रदर्शयामो येनाचार्य सरणिःस्थापितास्यात् ॥ प्रथमंबिरुदावल्यां ॥ सत्सं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रदायाचार्येति ॥ स्वसंमतसत्संप्रदाया चार्यत्वंरामानु
जाख्ये प्रथमपुरुषे प्रसिद्ध मतस्तदा चार्यत्वमत्रव्या
हतं ॥ सर्वतंत्रस्वतंत्रेति ॥ सचेशधर्मोजीवेव्याहतः ॥
यद्यव्याहतस्तदा जितमस्माभिर्भेदवाद विदलनात् ॥
एकतंत्र स्वतंत्रोपिपाणिन्यादिर्नकिंकरः ॥ सर्वतंत्र
स्वतंत्रोपि किंकरोपीत्यसांप्रतं ॥ इदंचत्वन्मतमेव ॥
पंडितस्वामीति ॥ नहिपंडितैः स्वामित्वंदत्तंयथा ज
गन्नाथरायाय पंडितराजत्वंदत्तं ततस्तत्स्वामित्वं
व्याहतं ॥ रामेतिमातृदत्तंनाम ॥ मिश्रेति ॥ उपप
न्नं मिश्रत्वं गार्हस्थ्यसंन्यासो भयलक्षणां गीकारात् ॥
शास्त्रीति ॥ तमेतं वेदानुवचनेन ब्राह्मणाविविदिषं
ति ॥ ब्राह्मणाःप्रव्रजंति ॥ ओमितिब्राह्मणःप्रवक्ष्य
न्नाह ॥ ब्रह्मोपाप्नवानीति ॥ ब्रह्मैवोपाप्नोति ॥
नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः ॥
एकेमुख्यावर्णेषुब्राह्मणाः ॥ उपन्यस्तवाक्यैकवाक्या
त् ॥ एवंविधशास्त्रसंघेसत्यपिक्षत्रियवैश्ययोःसंन्या
साधिकारदातुःशास्त्रित्वंव्याहतं ब्राह्मणत्वंचतथा ॥
जातिसंरंभोन्यएवसः ॥ किमुवक्तव्यंसतिशास्त्रबले॥
नब्राह्मणसमत्वमभ्येतिवर्णांतर मितिश्रुतीनामर्थः ॥
इतिविरुदावलीव्याघातः प्रथमःपुलाकः ॥ १ ॥ अत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रंथेमंगलाचरणेतृतीयः श्लोकः ॥ त्रिदंडिनोमहात्मा
नोयेपिनन्वेकदंडिनः ॥ तेभ्योयतिभ्यःसर्वेभ्योगृहि
णोमेनतिःसदेति ॥ स्वस्यब्राह्मणस्यसतःक्षत्रियावै
श्याश्चैकदंड त्रिदंडाधिकारिणो निर्णीताःस्वकृतनम
स्कारार्हाइत्यंगीकृतमतएवसर्वेभ्यइत्युक्तं ॥ येकेचन
शास्त्रसंमताअधिकारिणो नमस्कारेणतुष्टाः शांतिमा
प्नुवंतुभीष्मेपरशुरामइवार्जुनेद्रोणइवेति ॥ येकेचि
त्स्वयं निर्णीताअधिकारिणस्तेऽसौब्राह्मणः सन्नपिन
मस्कृत्यब्राह्मणत्वं संन्यासाधिकारं चददातितस्मादस्मै
यथेच्छंपारितोषिकं देयमितिसंकल्पयंत्वितिगूढाकूतं॥
कोन्यथेत्थंनमस्कुर्यात् ॥ किमिदंब्राह्मण्यंजातितोगु
णतोवा ॥ यत्क्षत्रियवैश्यपादयोः शिरोऽर्पयतिजाति
मिथ्यावादित्वं व्यंजयतिप्रकृतप्राकृतजनतोषाय ॥
किमेषसत्संप्रदायः ॥ कुत्रक्षत्रियवैश्यौकुत्रब्राह्मणए
तद्विचारणीयं विदितोभवेत्सत्संप्रदायः ननुक्षत्रियवै
श्यौननमस्करोमिकिंतुब्राह्मणानेव संन्यासिनइतिचे
ज्जितमस्माभिः किंकृतमनेननिबंधयत्नेन ॥ ताव
प्यधिकारिणौनमस्करोमिकोदोषइतिचेद्विस्मृतंशास्त्रं
वर्णानांब्राह्मणोगुरुरिति ॥ ननुनास्तिसंन्यासिषुवर्ण
इतिचेन्मास्तुत्वयितुवर्तते ॥ उपाधिधर्मोयंयोनिनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्तोयावच्छरीरंवर्तते ऽभिमानस्तुनास्तिकश्चित् ॥ तस्माद्वर्णंस्मृत्वानमस्कारःकर्तव्यः ॥ इतिमंगलाचरणेवादिविजयपटहभेदः ॥ अलमस्मैएकएवदंडः ॥ इतिद्वितीयःपुलाकः ॥ २ ॥ प्रथितक्षत्रियोजनकोन प्रवव्राजकस्मात् ॥ याज्ञवल्क्यःप्रवव्राजकस्मात् ॥ ब्राह्मणत्वादितिचेत्तद्दमुत्तरंसर्वस्यग्रंथस्य ॥अन्यन्नकिंचित्तारतम्यं ॥ वैश्योनकोप्युदाहृत्तःसंन्यासी ॥ येन तदधिकारेबलसिद्धिः ॥ अनुन्मत्तावुन्मत्तवदाचरंत इतिश्रुतिविषयंसिद्धतमंदुर्वाससंपरमहंसंपुरस्कृत्यपरमहंसेषुत्रिदंडनिर्णयउन्मत्ताचारान्नातिरिच्यते ॥ तथा जडभरतं प्रकृत्यपरमहंसेषुशिखासूत्रनिर्णयोजडत्वान्नातिरिच्यते॥चित्रमेतत्सर्वं॥ क्वोन्मत्ताचारःसर्वतंत्रस्वतंत्राणांक्वदंडनिर्णयः ॥ तन्निकटएकएवदंडआसीच्छापोनाम ॥ सर्वतंत्रस्वतंत्राअकिंकराभवंति ॥ कदाचित्कथंचिदाचरंतिनाश्रमसंप्रदायंनियमयंति ॥ अतएवोत्तमानांवचः सत्यंचरित्रंतुक्वचित्क्वचिदिति वचनस्योदाहरणमिदं ॥ त्वंयिशास्तारिसत्यपिखलाःखलत्वंनमुंचंतीतिश्रीकृष्णंप्रतिहंसडिंभखलत्वनिवेदनायेदंचरित्रंदुर्वाससः ॥ संन्यासिषुकुचोद्यमाचरंतोहंसायंतेडिंभायंतेवेतिहरिवंशकथातात्पर्यं ॥ जनकं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरस्कृत्यैकाश्रम्यंस्थापितं सुलभांपुरस्कृत्यसलिंगसं-
न्यासःस्त्रीणांस्थापितः ॥ तथैवद्रौपदींपुरस्कृत्यपंच
पतयोपिस्थापिताःस्युः ॥ यथादृष्टांतस्तथाशास्त्रमि
तितवमतं ॥ सकलविधदृष्टांतदर्शनात्सर्वतंत्रस्वतंत्र
त्वमव्याहत मेवेतितवाऽभिप्रायोदृष्टांताधीनोनशास्त्रा
धीनः ॥ मतेःशास्त्राधीनत्वंपाडित्यं ॥ शास्त्रंच ॥
ब्राह्मणाःप्रव्रजंति ॥ क्षत्रियस्यत्रयआश्रमाइति ॥
व्याहृतिभिःसन्यासः ॥ नस्त्रीणांव्याहृतिप्राप्तिस्त
स्यागायत्र्यासहकृतत्वात् ॥ नस्त्रीणांगायत्री ॥ तत्स
त्वेपतिगोत्रप्रवेशानापत्तेः पितृगोत्रेणप्रतिबद्धत्वादुपन
यननिमित्तेन ॥ तस्मात्पतिगोत्रेणगोत्रवत्याःपतिसं
न्यासेनसंन्यासः ॥ पत्युःसलिंगत्वेलिंगवतीतैरेवलिं
गैः ॥ अलिंगोयाज्ञवल्क्यसंन्यासः ॥ तस्मात्सुलभा
लिंगरहितसंन्यासिनी ॥ सौभाग्यवत्यपितथैवमैत्रे
यीतुल्यन्यायात् ॥ एकावैराग्यशीलाऽपरास्त्रीस्व
भावासंन्यासःसमउभयोरग्निदाहःप्रैषानधिकारात् ॥
तस्माच्छास्त्रबाह्यःस्त्रीसंन्यासः ॥ चत्वारोब्राह्मण
स्योक्ताआश्रमाः श्रुतिचेदिताः ॥ क्षत्रियस्यत्रयः
प्रोक्ताद्वावेकोवैश्यशूद्रयोः ॥ अत्रवचनेपुंस्त्वंविव
क्षितं ॥ अष्टमेवर्षेब्राह्मणमुपनयीतेतिवत् ॥ स्त्रीणांप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्युरंगत्वेनाश्रमधर्मानस्वतंत्राः ॥ क्षत्रियवैश्ययोस्त्रि
ष्टुब्जगत्यधिकारिणोर्व्याहृत्यभावान्नसंन्यासः ॥ गा
यत्र्यधिकारपक्षेपित्रयोद्वाविति नियमेनबद्धः ॥ एतेन
ऋभुनिदाघादयोभवदुदाहृतास्त्यागिनो विरक्तावानप्र
स्थाः संन्यासिसदृशाः पाशुपताः नसंन्यासिनइतिसि
द्धं ॥ शास्त्रबाधापेक्षयाऽश्रमभ्रमबाधस्यौचित्यात् ॥
ननुअस्तितेषांब्राह्मणशब्दः ॥ योयज्जायतेसब्राह्मण
स्तस्माद्राजन्यंवावैश्यंवाब्राह्मणइत्ये वब्रूयाद्योयज्जाय
तेसब्राह्मणइतिशतपथश्रुतेरितिचेदनयाश्रुत्यावर्णद्वय
मेवसिद्धं ॥ वर्णत्रयंमेलयित्वाब्राह्मणइत्येकोराशिः ॥
शूद्रइत्येकोराशिः यौक्षत्रियवैश्यावनूद्यब्राह्मणत्वंविध
त्ते तौक्यदिक्षत्रियवैश्यावुच्येतेतदाब्राह्मणइत्येवब्रूया
दितिनियमविरोधः ॥ क्षत्रियंवैश्यंनब्रूयादितिनियमफ
लात् ॥ यदिब्रूषेक्षत्रियंवैश्यंतदास्वमतच्युतिरुद्देश्यवि
रुद्धविधेयासिद्धेः ॥ उत्पत्तिमात्रेणब्रह्मत्वंचेच्छूद्रेणापि
जितं ॥ व्यवस्थार्थंब्राह्मणयोनाविति श्रुतिशेषस्वीका
रेजितमस्माभिः ॥ आपदाक्षत्रियादिवृतिमाश्रितोब्रा
म्हणोब्राम्हणएवतंराजन्यंवैश्यंचनब्रूयादितिश्रुतिसम
न्वयः ॥ वर्णाश्रमव्यवस्थाच ॥ अतएवोपनयनसम
येलिंगभेदोदर्शितः ॥ काषायंब्राम्हणस्यमांजिष्टंक्षत्रि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्यहारिद्रंवैश्यस्येतिगृह्यसूत्रे ॥ अत्रपुंस्त्वंविवक्षितं॥ यदिकाषायादिलिंग व्यवस्थार्थंवर्ण भेदांगीकारस्तदा निरस्तंब्राम्हणशब्दवाच्यत्वंक्षत्रियवैश्ययोर्भवता ॥ स्वनिरस्तंब्राम्हणत्वंस्वयंविधत्तेचित्रं ॥ वर्णसंप्रदायमूलंवचनं ॥ काषायमात्रसारोपियतिः पूज्योयुधिष्ठिरेति भीष्मस्य॥काषायसारत्वंब्राम्हणानामितरेषांनाधिकारः ॥ अतएवश्वेतांबराः पीतांबरादिगंबराइतिब्राम्हणेतरसंन्यासिषुप्रसिद्धानिलिंगानि॥तस्माद्ब्राम्हणानामेवाधिकारोवैदिककाषायादिलिंगधारणे ॥ त्रिदंडएकदंडोवाऽस्तु ॥ ब्राम्हणानांक्षत्रियाणांचलिंगभेदोदर्शितः ॥ द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ ॥ परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतइति ॥ एषक्षत्रियसंन्यासोयद्रणेभिमुखमरणं तस्यलिंगंशस्त्रंनवैणवोदंडः परिव्राजोयोगयुक्ततालिंगं ॥ नदंडादंडोवा ॥ यथाहभगवान् ॥ मौनानीहानिलायामादंडावाग्देहचेतसां ॥ नह्येतेयस्यसंत्यंगवेणुभिर्नभवेद्यतिरितिदंडानांनयतिलक्षणप्रवेशइत्येकादशस्कंधे ॥ एतेनसर्वेचैवत्रिदंडिनइतिस्मृतिरांतरदंडविषयेतिभगवदभिप्रायोवेदितव्यः ॥ वेणूनांमौनादिसहितानामेवलक्षणप्रवेशइतिचेन्न ॥ नालिंगंधर्मकारणमितितत्रैववचनांतरात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगारुढस्यनदंडंनकमंडलुमित्यादि निषेधवाक्यैकवा
क्याच्च ॥ तथाचगीतायां ॥ नैष्कर्म्यसिद्धिपरमांसंन्या
सेनाधिगछति ॥ नैष्कर्म्यसिद्धिमिति ॥ अन्यत्रधर्मा
दन्यत्राधर्मादन्यत्रास्मात्कृताकृतादितिब्रूम्हलक्षणात्
परमांब्रह्मीभावरूपां ॥ इत्थंसंन्यासफलमभिदधतास
न्यासलणमुक्तं ॥ यंसंन्यासमितिप्राहुर्योगंतंविद्धिपां
डव ॥ नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चनेति ॥ संक
ल्पमूलैषणात्यागः ॥ समंत्रकोव्याहृतिपूर्वःससाक्षिकः
संन्यासोब्रम्हीभावप्रदइतिश्लोकद्वयस्यार्थः ॥ एवमु
क्तलक्षणसंन्यासेसति ॥ आरुरुक्षोर्मुनेर्योगंकर्मकारण
मुच्यते ॥ योगारूढस्यतस्यैवशमःकारणमुच्यते ॥
इतितस्यमुनेः संन्यासिनोपिलिंगधारणकालमर्यादो
क्तायोगारोहणांतं ॥ तदनंतरंयोगारोहकर्मणिप्रयु
क्तानिश्रवणमननादीनिनापेक्ष्यंतेकुतस्तरांदंडादयःकृ
तकार्यत्वात् एषचतुर्थीभूमिमधिरूढः ॥ बुधोबाल
कवत्क्रीडेत्कुशलोजडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गो
चर्यांनैगमश्चरेत्इतिस्थितिविषयोभवतिअतएवनदंडंन
कमंडलुमित्यादिनिषेधचारितार्थ्यं ॥ योगारोहोनामब्र
म्हीभावःतच्चसिध्यतिसंन्यासात् ॥ कस्मात् ॥ अहोबत
जीवत्वमेषणात्रयमग्नत्वंतत्यागोब्रम्हत्वं ॥ एषयो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोयदासिध्येत्तदानकर्मापेक्षाऽतोनशिखासूत्रा पेक्षात तोमुंडनंप्राप्तंकर्मणांमषणामूलत्वात् ॥ एषणाव्यु त्थानकर्मणिविनियुक्तः ॥ प्रैषमंत्रोब्रम्हीभावप्रदोय दुच्चारेणसंन्यासीत्युच्यते ॥ एषणात्रयत्यागः समंत्र कः संन्यासशब्दार्थः ॥ ततएवतेषां ब्रह्मीभूतानामि तिसंकल्पः ॥ यश्चसंन्यासाभासस्त्रिदंडोनामानेकाश्र मसंकीर्णलिंगः काम्यकर्मत्यागाधिकारीसगायत्रस्त स्यनब्रह्मीभूतस्येतिसंकल्पः ॥ एषणात्यागेयतमान त्वेननैष्कर्म्यसिद्धेरभावात् ॥ अतउभयंलिंगंशिखासू त्रेदंडाश्चेति ॥ एषप्रथमभूमिमारूढः ॥ आश्रमत्रय संकीर्णत्वात्त्रयोदंडाः ॥ श्रवणाधिकारी ॥ ततोऽस्य यथाधिकारंलिंगप्राप्तिर्दैवेपित्र्येचाधिकारद्योतकं शि खासूत्रमेषणात्यागयत्नद्योतकंत्रिदंडं ॥ एषणात्यागेक र्मानधिकारान्मुंडनमेकदंडश्च ॥ गायत्रोवापालाशइति श्रुत्यायथापालाशदंडोब्रह्मचारिणएषणाप्रविष्टस्यतथा निर्जिगमिषोस्त्रिदंडंगायत्रंवैणवंसमावृतत्वात् ॥ अत एवकर्माधिकारः ॥ कर्मानधिकारान्मुंडनंयथातथाब्रा ह्मणएवब्रह्मीभावाया चार्यत्वायचकल्पते नान्यइति ख्यापनायैकदंडः प्रणवांगः ॥ मुखजानामयंधर्मोय द्विष्णोर्लिंगधारणं ॥ बाहुजातोरुजातानांनायंधर्मोवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धीयतइतिस्मृत्याचार्यलिंगंब्राह्मणानामेवेतिनियमेन क्षत्रियवैश्ययोर्निषिद्धं॥यद्येतयोस्त्यागोदृश्येतत्तथापि संन्यासशब्दंनार्हतः ॥ यस्तुकर्मफलत्यागीसत्यागी त्यभिधीयतइतिसंन्यासशब्दोबाध्यतेत्यागिशब्दविधा नात् ॥ ननुत्यागसंन्यासशब्दौपर्यायौ ॥ भवत्यत्या गिनांप्रेत्यनतुसंन्यासिनांक्वचित्इति त्यागसंन्यासश ब्दयोरेकार्था भिधानादितिचेद्युक्तमुक्तंत्यागव्याप्यो हिसंन्यासः ॥ त्यागशब्देनाभिधीयेत ॥ तथापिप्रैष मंत्रोच्चाराधिकाराऽनधिकारभेदेनव्यवस्थापनीयौ ॥ अतएवव्यवच्छिनत्तिनतुसंन्यासिनांक्वचिदिति ॥ त स्मादितरेषांत्यागिनांप्रेत्यफलंभवतीतिसंभाव्यते ॥ अतएवत्यागीभरतोजन्मांतरंभेजे ॥ यौस्वपुत्राचार्य त्वमेवब्राह्मणायदत्तस्तयोःपुरोहितगोत्रेणगोत्रवतोःक थंजगद्गुरुलिंगधारणाधिकारः ॥ गुरुत्वाभावाद्भिक र्माधिकारः ॥ लिंगबाधाल्लिंगांतराविधानात्क्षत्रियादी नांनसंन्यासइतिजनकोभीष्मश्चनप्रवव्राज ॥ एतेन निदाघादयस्त्यागिनोनसंन्यासिनइतिसिद्धं ॥ अत एवक्षत्रियेणसतासर्वज्ञेनापिकृष्णेनगुरुत्वंब्राह्मणेभ्यो दत्तं ॥ उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनइति ॥ तेप्रसिद्धाब्राह्मणास्तत्वदर्शिनोज्ञानिनः शाब्देपरेचनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्णातास्तेतवब्राह्मणजन्मनि ॥ अथवाऽर्जुनस्यविशे
षणंज्ञानिनइति ॥ मदुपदेशात्परोक्षज्ञानिनस्तवब्राह्म
णजन्मनितत्वदर्शितोदेष्यतीत्यर्थः ॥ औपनिषदज्ञा
नेब्राह्मणानामेवाधिकारःइतिगम्यते॥एतेनजनकयाज्ञ
वल्क्यौव्याख्यातौअतएवकर्मण्येवाधिकारस्तेमाफले
षुकदाचनेत्यधिकारनिर्देशः ॥ तेतवक्षत्रियत्वात् ॥ स्व
स्यज्ञानितमस्यापितमेवाधिकारमाह ॥ उत्सीदेयुरि
मेलोकानकुर्यांकर्मचेदहं ॥ संकरस्यचकर्तास्यामुपहं
न्यामिमाःप्रजाइति ॥ अतएवक्षत्रियस्यत्रयआश्रमा
नैष्कर्म्याधिकाराभावात् ॥ वैश्यस्यद्वौशूद्रस्यैकः ॥
इतिचत्वारोप्याश्रमिणोनब्रात्याः ॥ शूद्रःप्रसिद्धएका
श्रमीसर्वेषांधर्माणामेकाश्रमेसंग्रहात् ॥ इदमैकाश्र
म्यंकिंतवसंमतं ॥ उताश्रमांतरासंकीर्णलिंगःपरमहं
सएकाश्रमीपूज्यतमः प्रसिद्धतमश्चाश्रमांतरानधिका
रीति॥इदमैकाश्रम्यमित्याचार्याइतिधर्मसूत्रस्याकूत
माश्रमांतरस्यपारमहंस्यांतत्वात्तदंगत्वादेकएवाश्रमइ
ति ॥ ब्रह्मचर्यात्समुत्पन्नस्याश्रमयज्ञस्यसंन्यासेऽव
भृथः ॥ अतएवब्रह्मचर्यादेववाप्रव्रजेदितिश्रुतिःसंग
तापूर्णाहुतिन्यायात् ॥ ननुप्रत्यक्षविधानाद्गार्हस्थ्यस्ये
तितदंताआश्रमाइतिचेन्नतदंततासिद्धिःकर्मणिभावे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्ययात्भावकर्मणोःप्रत्यक्षताविधीयते ॥ तथैकाश्र म्यमित्यत्रापि ॥ एकाश्रमकर्मणाभावेनाऽसंकीर्णलिं गस्तिष्ठेत्गृहीचसंन्यासीचेतिनतिष्ठेदित्यर्थात् ॥ ग्राहि णांप्रैषमंत्राभ्यासोनिषिध्यते ॥ समावृतस्यगृह्याग्निंस मारोप्यसंन्यासविधानाच्चनाश्रमेसंकीर्णत्वं ॥ वर्णा श्रमसांकर्यवचनमाचार्यत्वविरुद्धं ॥ ब्राम्हणशब्दएव व्याकरोत्यधिकारंब्रम्हशब्दात्तस्येदमित्यणिब्राम्हणश ब्दः ॥ तस्माद्योनिविशेषोब्रम्हतस्यायं॥योनिमहिम्ना शास्त्रयोनेर्ब्रम्हणःसंबंधः ॥ तपःश्रुताभ्यांतदधिगमस्त दाब्राम्हणयोनिःसफलाब्राम्हण्यंचसफलं ॥ तपःश्रुता भावेजातिब्राम्हणएवनान्यस्तपःश्रुताधिकारानपगमा त् ॥ तस्मात्तंब्राम्हणइत्येवब्रूयान्नान्यंराजन्यंवावैश्यं वा ॥ किंबहुना॥ इतरयोनेर्ब्रम्हसंबंधकारकत्वाभावात्त दुत्पन्नोब्राम्हींदीक्षांसंन्यासंनार्हतीति ॥ गुणतोवर्णां गीकारेसापिंडयोच्छेदप्रसंगोयदेकजातानामपिस्वभा वाअनेकविधास्तभ्देदाद्वर्णभेदेसापिंडयादर्शनाच्चत्वारो पिभ्रातरोऽसपिंडास्ततोमृताशौचाद्यव्यवस्थापत्तिःयो नितएववर्णांगीकारेजातिधर्मव्यवस्थासिद्धिः॥तत्सिद्ध येक्षत्रियत्ववैश्यत्वांगीकारेवृथाप्रयासोब्राह्मणशब्ददा ने ॥ परंतुदुःसहंब्राम्हणशब्दंनसहेयातांसापिंड्योच्छे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दाभिया॥यदिनोच्छिद्येततदाक्षत्रियत्वंवैश्यत्वंचनलुप्ये त ॥ तस्माज्जातिब्राह्मणएवब्राम्हणशब्दार्थः॥ एषणा त्यागोव्याहृतिपूर्वएवसंन्यासस्तेनसिध्यतिमोक्षोनामब्र ह्मीभावोब्राम्हणानांताच्चिन्हमेकदंडःपूर्णब्राह्मण्यद्योत कः ॥ ब्रह्मीभावस्याप्रतिबद्धत्वात् ॥ सतिचिन्हे मुंडनमेकदंडोऽकर्मिता ऽद्वितीयसिद्धांतप्रतिपादकोब्रा ह्मणस्यैवपूज्यतमस्यपूज्यतमंलिंगं ॥ अपूज्यवर्णो त्पन्नौक्षत्रियवैश्यौकथमर्हतः ॥ येनवर्णसांकर्य भ्रमोनस्यात्तथाचरंतिशिष्टाः ॥ ननुव्यासस्यान्ययो निसमुत्पन्नस्यब्राह्मणत्वं दृष्टमितिचेद्युक्तंयोनि दोषा भावादाकालिकसमुत्पत्तौबीजगुणाद्ब्राह्मणत्वं ॥ ए तेनशुकोव्याख्यातः ॥ अरण्यामाकस्मिकत्वात् ॥ पराशरोत्पत्तियोन्याद्वयोर्ब्राह्मण्यंचरितार्थं ॥ इतितृ तीयः पुलाकः ॥ ३ ॥ ननुनैकदंडपक्षः ॥ श्रेया न्किंतुत्रिदंडपक्ष इतिचेदस्तुगौणत्वात्क्षत्रियवैश्यांधपं ग्वादिभ्यः समर्पितः ॥ त्रिदंडपक्षोमुख्यतमोपिस्वसं मतविशिष्टाधिकारिषुस्त्रीषुक्षत्रियेषुचसमर्पितः ॥ न ब्राह्मणायासाधारणंलिंगंपरिशिष्टं ॥ अस्तुयत्क्षत्रिय वैश्यस्त्रियोब्राह्मींदीक्षांनार्हंतिकुतोलिंगं ॥अंधपंग्वादि लक्षणानिस्वयमुपन्यस्तानिस्मार्तांति ॥ अजिव्हःपं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

डकः पंगुरंधोबधिरएवच ॥ मुग्धश्चमुच्यतेभिक्षुः ष
ड्भिरेतैर्नसंशयः ॥ १ ॥ इदंमृष्टमिदंनेतियोऽश्नन्न
पिनसज्जति ॥ हितंसत्यंमितंवक्तितमजिव्हंप्रचक्षते॥
॥ २ सद्योजातांयथानारींतथाषोडशवार्षिकीं ॥ शत
वर्षांचयोदृष्ट्वानिर्विकारः सषंडकः ॥ ३ ॥ भिक्षार्थम
टनंयस्याविण्मूत्रकरणायच ॥ योजनान्नपरंयातिस
र्वथापंगुरेवसः ॥ ४ ॥ तिष्टतोव्रजतोवापियस्यचक्षु
र्नदूरगं ॥ चतुर्युगद्वयंत्यत्कापरिव्राट्सोंधउच्यते ॥ ५ ॥
हिताहितंमनोरामंवचः शोकावहंयतिः ॥ श्रुत्वायोन
शृणोतीवबधिरः सप्रकीर्तितः ॥ ६ ॥ सान्निध्येविष
याणांयः समर्थोविकलेंद्रियः ॥ सुसवद्वर्ततेनित्यं
सभिक्षुर्मुग्धउच्यते ॥ ७ ॥ ईदृशलक्षणसंपन्नायद्ये
कदंडाधिकारिणस्तदात्रिदंडपक्ष उक्तलक्षणहीनेषुयो
जितः कथंमुख्यतामापद्येत ॥ एतेनइंद्रस्यवज्रोसी
तित्रिदंडंबिभृयाद्यद्येकदंडंसशिखंवपनं कृत्वाशिखांसू
त्रंचाप्सुजुहुयाद्भुमौवाक्षिपेदिति सूत्रव्याख्यानप्रसंगे
त्रिदंडप्रतिष्टाप्रख्यापनंकुत्रपर्यवसितं ॥ अतएवार्जु
नादिभिर्विवेषे योजितस्त्रिदंडपक्षः ॥
वस्तुतस्तुकलौत्रिदंडपक्षोनिषिद्धः ॥ चत्वार्यब्दसहस्रा
णिचत्वार्यब्दशतानिच ॥ कलेर्यदागमिष्यंतितदात्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तापरिग्रहः ॥ संन्यासश्चनकर्तव्यो ब्राम्हणेनविजान
तेतित्रिदंडोनिषिद्धःसर्वाधानेनसह ॥ गृह्यश्रौताग्न्योः
सांकर्यंसर्वाधानंगार्हस्थ्यसंन्याससांकर्यंत्रिदंडः संदि
ग्धत्वान्निषिध्यते ॥ असंकीर्णद्वयंपुनर्विधीयते ॥
यावद्वर्णविभागोऽस्तियावद्वेदःप्रवर्त्तते ॥ संन्यासंचा
ग्निहोत्रंचतावत्कुर्यात्कलौयुगेइति ॥ कस्मादेतदसं
दिग्धमितिचेत्त्रिदंडस्यार्जुनेनसंदेहेपातनात् ॥ यच्च
शिखैकदेशत्यागःसूत्रेष्वेकसूत्रत्यागइतिपक्षः स्वीकृ
तः ॥ सकिंप्रत्यहमुतैकाहं ॥ आद्येऽल्पैरेवदिनैः शि
खाभावप्रसंगः ॥ द्वितीयेपियाभ्यांशिखासूत्राभ्यांकं
र्माधिकारोदत्तस्तत्त्यागेकर्माधिकारःस्वयंत्यक्तः ॥ तदा
किंपरिशिष्टशिखासूत्रैः ॥ यदिकर्माधिकारोनत्यक्तः ॥
किंतेनशिखासूत्रत्यागेन ॥ कर्माधिकारमूलोपनयना
धिकारसिध्यर्थेशिखा ॥ ततः प्रभृतिअवैदिककर्माधि
कारसिद्धिः ॥ उपनयनोत्तरंश्रौतस्मार्तकर्मानुष्ठानसि
ध्यर्थेयज्ञोपवीतधारणंकरिष्ये इतियज्ञोपवीतधारणसं
कल्पः प्रसिद्धतमः सचबाधितोयज्ञोपवीतत्यागेन ॥
तदामुंडनंप्राप्तंतदेवाकर्मित्वं ॥ ननुकुर्वंतिकर्माणियथे
ष्टंकथमकर्मिता॥किंनजानीषेब्राम्हंमार्गं ॥ संन्यासो
नामब्राम्हीदीक्षायोगस्तमभिप्रेत्यकर्मा शुक्लकृष्णंयो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गिनस्त्रिविधमितरेषामितिसूत्रयामासपतंजलिर्वैदिक मार्गपंडितः ॥ भगवानपिगीतायां ॥ अनिष्टमिष्टं मिश्रंचत्रिविधंकर्मणः फलं ॥ भवत्यत्यागिनांप्रेत्य नतुसंन्यासिनांक्वचिदिति ॥ ननुचित्रमेतत् ॥ क्वायंवेषात्मासंन्यासः कुत्रमोक्षोनयत्रफलसंबंधः ॥ नचित्रंतत् ॥ एषसंस्कारमहिमा ॥ अतएवशास्त्रसफलं ॥ किंनजानीषेवैयासिकंसूत्रंतदधिगमउत्तरपूर्वाघयोरश्लेषविनाशाविति ॥ संन्यासएवतदधिगमः प्रतिबंधक्षयात् ॥ अतएवउद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतमितिसंन्यासफलं ॥ यत्करोषीतिगीताश्लोकोच्चारस्तुन संन्यासस्तत्रैवकर्माधिकारप्रतिपादनात् ॥ इतिचतुर्थः पुलाकः ॥

सर्वेषुसर्वेवर्णाः सर्वेषुसर्वेप्याश्रमागुणप्राधान्यादित्यंगीकुर्वतावर्णसंकरं विनाकिंसिद्धांतितमस्यांतुरीयमीमांसायां ॥ ग्रहस्थानामेषणात्रयमग्नानांप्रैषमंत्रोच्चारांगीकारएषणात्रयत्यागकर्मणिविनियुक्तोयः ॥ महत्साहसमेतत् ॥ येनकर्मणासर्वेप्याश्रमा लुंठिताः ॥ अत्यल्पेनैवकालेनाविप्राद्विषड्गुणयुतादर विंदनाभपादारविंदविमुखाच्छूपचंवरिष्टमितिश्लोकमवलंब्यश्राद्धेश्वपचंनियुंजानाआपिजनादृश्येरन् ॥ एतत्समयचरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रं॥याचनिंदासंन्यासिनांसा संमताऽस्माकंकालोपह
तत्वाद्धर्माणांगार्हस्थ्यवत्निंदास्तुत्योरधिकारार्धानत्वा
त्॥ ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः॥ सलिंगा
नाश्रमांस्त्यक्त्वाचरेदविधिगोचरइति॥ जिज्ञासुरपियोग
स्यशब्दब्रह्मातिवर्ततेइतिचभगवतःशिक्षांनाटयंतिबह
वः॥ यदिभक्तएवविधिनिषेधागोचरस्तदाकिमुवक्तव्यं
ज्ञाननिष्ठोविधिनिषेधागोचरइति॥ ततन्निष्टत्वंतत्तद्दी
क्षयावगंतव्यं॥ यत्रब्राम्हणकुलेसमुत्पन्नस्तद्ब्राह्मण्य
मेवनविजानातिपरमहंसधर्मंविवृणोतिचित्रं॥वृश्चिक
मंत्रमविजानन्सर्पबिलेहस्तंक्षिपति॥ रागद्वेषा-
भ्यांनधर्मनिर्णयःपारयितुंशक्यतेइतिसत्यंविज्ञेयं॥ हं
सःश्वेतोबकः श्वेतः कोभेदोबकहंसयोः॥ नीरक्षीरवि
वेकेतुहंसोहंसोबकोबकः॥ अस्तु॥भीष्मःक्षत्रियःसन्ने
वविष्णुसहस्रनामफलकथनप्रसंगेब्राह्मणेतरस्यमोक्षा
धिकारमुपनिषदधिकारंचबाधते॥ यथा॥ वेदांतगोब्रा-
ह्मणःस्यात्क्षत्रियोविजयीभवेत्॥वैश्योधनसमृद्धःस्या
च्छूद्रःसुखमवाप्नुयादित्यधिकारभेदेनफलभेददर्शनात्
अतएवस्वयंनसंन्यस्तवान्॥ मोक्षाश्रमानधिकारात्
भगवतापितारतम्यंदर्शितं॥ मांहिपार्थव्यपाश्रित्ययेपि
स्युःपापयोनयः॥ स्त्रियोवैश्यास्तथाशूद्रास्तेपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यांतिपरांगतिं ॥ किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षय स्तथेतिकिंपुनरितिकाकुः ॥ ब्राह्मणाब्रह्मसंबद्धाःपरां गतिंब्रह्मीभावंयांतीतिनचित्रमिति॥अतएवपुण्याइति विशेषणं ॥ योनिमहिम्नापुण्यत्वं॥राजर्षीणांचभक्ताइ तिविशेषणं ॥ तदेवेतरेषामपिप्राप्तंक्रमेणतेऽधिकारि जन्मसमासाद्यमुच्यंतइत्यपिशब्दार्थः ॥ अनधिकारि जन्मापादिकायोनिःपापयोनिः॥विजिगीषाक्षत्रियस्य स्वभावः॥विविदिषाब्राह्मणस्य ॥ जिघृक्षावैश्यस्य ॥ दास्यंशूद्रस्येतिभीष्मवाक्यस्यार्थः ॥ अयंनीरक्षीर विवेकः ॥ गोकुलेनिवसन्भगवानपिगोपकन्यायथे च्छमंगीचकारयज्ञपत्नीश्चनमश्चकार ॥ अस्यांब्राम्ह-णयोनौशास्त्रमूलेऽहमेवभवामिभविष्यामिभूतश्च ॥ अविद्योवासविद्योवाब्राह्मणो मामकीतनुरितिप्रतिज्ञा नात् ॥ यथाऽजामिलोवाल्मीकिर्वसिष्ठोवा ॥ योनि महिम्नाब्राम्हणत्वंसिद्धंतपः श्रुताभ्यांविजानातितदा ऽहंब्रह्मास्मीतिवदेदेषयोनिमहिमा ॥ ततउक्तंव्यासेन शास्त्रयोनित्वादिति ॥ तदहमस्मिशास्त्रयोनिः ॥ त-स्मादेतच्छास्त्रंयाब्राह्मीयोनिः ॥ याक्षात्रीसाशस्त्रं ॥ यावैशीसातुला ॥ याशौद्रीसादासी ॥ तस्मात्तागो-पकन्यकाअंगीचकारब्राह्मणीर्नमश्चकारमोक्षभूमीः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मात्क्षत्रियजातौमोक्षस्याशापिनास्ति ॥ तस्मात्स
तिवैराग्येब्राह्मणःसंन्यसेत्क्षत्रियःशस्त्रंविभृयात् ॥ अ
तएवज्ञानिवर्योभीष्मोवसुष्वलीयतशस्त्रकरः ॥ जड
भरतोपितृतीयेजन्मनिब्राम्हणस्तत्रमुक्तोबभूव ॥ अ
तएवभगवतोक्तं ॥ शुचीनांश्रीमतांगेहेयोगभ्रष्टोऽभि
जायते ॥ अथवायोगिनामेवकुलेभवतिधीमतां ॥ ए
तद्धिदुर्लभतरंलोकेजन्मयदीदृशं ॥ तत्रतंबुद्धिसंयोगं
लभतेपौर्वदेहिकं ॥ यततेचततोभूयःसंसिद्धौकुरुनंदने
ति ॥ यतमानोभरतोहरिणसंगेनभ्रष्टस्तृतीयेजन्मनि
शुचीनांब्राम्हणानांशुचिर्विप्रःशुचिःकबिरितिश्रुतेः ॥
श्रीमतांऋचःसामानियजूंषि ॥ साहिश्रीरमृतास
तामितिश्रुतेर्विद्यावतांगृहेजजानाथवाऽत्मारामाणामे
ववेदरहस्यविदांगृहे ॥ तत्फलंनिरूपितंएतद्धीत्यादि
ना ॥ श्रुतिश्चनास्याब्रम्हवित्कुलेभवतीति ॥ तस्मात्
सर्वापेक्षाचयज्ञादेरश्ववदितिवैयासिकंसूत्रंब्राम्हणेष्वेव
संगच्छतेसामग्र्याअन्यूनत्वात् ॥ क्षत्रियादिर्बिरक्तउ
भयभ्रष्टोभवतिनशस्त्रंनशास्त्रमिति ॥ तस्माद्गीतास
मन्विताभरते ॥ एतेनक्षत्रियत्यागिनांगतिश्चिंत्या ॥ सं
न्यासाभावात् ॥ तस्मान्नतेषांब्रम्हीभूतानामितिसंक
ल्पः ॥ ब्रम्हीभावस्ययोन्यधीनत्वात्संस्काराधीनत्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च॥पूर्वंब्राम्हणजन्मसंपाद्यब्रम्हीभूतस्येतिसंकल्पंसंपा
दयिष्यंती तिनिर्विवादःपक्षोभरतादाहरणेनसमन्वि
तोभगवदुक्तउदाहृतक्षत्रियादिषुयोज्यः ॥ तस्मा-
द्योनिब्राम्हणानामेवाधिकारःसंन्यासेलिंगधारणेच ॥
यज्जातौयोगभ्रष्टाजनिष्यंतितज्जातेरुत्धारेकःसंशयः ॥
ननुकथमेतेनिदाघादयःक्षत्रियाः ॥ तस्यादेवालिं-
गाः ॥ पुनर्युद्धार्हाःपाशुपताभवदुपन्यस्तपृथुपौत्र
सुशीलवत् ॥ पाशुपतीहिदीक्षोपासनांगं सिद्धि-
मार्गः संन्याससदृशः प्रैषमंत्रवर्जनात् ॥ तेषांमुक्तौ
नप्रमाणं ॥ अवएवजन्मांतरेभवप्रत्ययोविदेहप्रकृति
लयानामितियोगसूत्रात्तंविद्याकर्मणीसमन्वारभेतेपूर्व
प्रज्ञाचेतिश्रुतेः सामग्रीसंयोजकब्राह्मणकुलेजन्मसं
पाद्यब्रह्मीभवंति ॥ ननुकथंविश्वामित्रेब्राम्हणशब्द
स्तस्माद्गुणतोवर्णांगी कारआवश्यकउभयोस्तदासर्वे
यंतुरीयमीमांसानिबंधः सुसंबद्धइतिचेदुपकृतंविश्वा
मित्रेणत्रिशंकाविव ॥ महतातपसाब्राम्हणशब्दंसंपा
दितवान्वसिष्टात् ॥ राजन्यंवावैश्यंवेतिश्रुत्यनुग्रहाभा
वात् ॥ यथाऽधुनाराजादिपदवीतथायंब्राह्मणशब्दः ॥
क्रोशमात्रेप्याज्ञायस्यनास्तिसोपिराजेत्युच्यते ॥ नैता
वताब्राम्हणजातिप्रवेशःसापिंड्यव्यवस्थानुपपत्तेः ॥ प्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जातंतुंमाव्यवच्छेत्सी रितिसापिंड्योच्छेदोनिषिद्धोंगी
कृतःस्यात् ॥ नान्यथाजात्यंतरप्रवेशः ॥ यत्रजातौप्रवि
ष्टस्तत्राप्याभिनवस्यसापिंड्यंनिरुद्धंकेनाप्यसंबंधात्॥
तस्माद्गोत्रप्रवर्तकोविश्वामित्रो जातिब्राम्हणएवयं
गायत्र्याऋषिंसस्माराभिनवो विश्वामित्रनामाब्राम्ह-
णः ॥ तस्यब्राम्हणशब्दलाभात्पूर्वंयद्गोत्रंतदेवानुवृ
त्तंसापिंड्यंच ॥ अन्यथोभयभ्रष्टत्वापत्तेरितिदिक् ॥
अतएवधर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यत इ-
तिभगवान् ॥ श्रेयोमोक्षतत्साधनंच ॥ अतएवयद
हंकारमाश्रित्यनयोत्स्यइतिमन्यसे ॥ मिथ्यैषव्यवसा
यस्तेप्रकृतिस्त्वांनियोक्ष्यतीति वचनेनपाशुपतास्त्रला
भसमयेशिवेनसहयुद्धंस्मारितं॥ प्रकृतिःक्षात्रयोनिःत
स्मात्सर्वधर्मान्परित्यज्यमामेकंशरणं व्रजेतिवाक्यस्य
प्रवाहप्राप्तयुद्धेतरधर्मानितिबोधप्रसंगेऽर्जुनेनकारिष्येव
चनंतवेत्युक्तं ॥ तस्माद्विश्वामित्रेण ब्राम्हणशब्देल
ब्धेपिनसंन्यासाधिकारोलब्धः सचजातिनिबद्धः ॥ न
तादृशंभाग्यंसर्वासांमातृणांयाःपुत्रब्रम्हीभावेनोद्धृताः
स्युः ॥ इदमत्ररहस्यं ॥ श्रीकाशीवब्राम्हणयोनिर्ब्रम्ह
त्वंदत्वापुत्रायकृतार्थाभवति ॥ यथावाल्मीकये ॥ अ
तएवद्रोणोयोगांतः ॥ सिंहीवक्षात्रयोनिर्योधयित्वापु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रान् ॥ अतएवभीष्मोरणांतः ॥ कूर्मीववैश्ययोनि
र्गोपनं ॥ अश्विनीवशूद्रयोनिर्दास्यं ॥ सत्येवंक्षत्रि
यादीनांसंन्यासाधिकारदानपरिश्रमः कस्मात् ॥ य
दिगृहीतुमुद्यताः सर्वेपरीक्षिताः क्षत्रियादयः ॥ अत
एवमदालसापुत्राअवधूतदशांप्राप्ताअपिनिजेनबंधुनाऽ
लर्केणयुयुधुः ॥ स्पष्टंचैतत्पुराणेषु ॥ युद्धेनैवभुजकं
डूतिः शाम्यतिक्षत्रियाणां ॥ ब्रम्हीभावेनैवब्राम्हणा
नां॥धनेनैववैश्यानां॥यशसैवशूद्राणां ॥ त्रिदंडोमुमुक्षु
लक्षणमेकदंडोमुक्तलक्षणमुभयंब्राम्हणएवपारयितुंश
क्नोति॥ त्रिदंडआत्मदमनार्थएकदंडोजगद्दमनार्थोऽत
एवपरमहंसपरिव्राजकाचार्यपदवीस्वामिपदवीचैकदं
डिनां ॥ ननुचित्रंसर्वत्यागः कुत्रस्वामित्वंचकुत्र ॥
नचित्रंयत्रसर्वत्यागस्तत्रैवस्वामित्वमव्याहतं ॥ यथा
नारायणशिवदत्तात्रेयादयस्त्यागिनोपिस्वामिनोपि ॥
तृप्तत्वात्त्यागिनः शासकत्वात्स्वामिनः ॥ शास्योव
क्तिशास्तारंस्वामीति ॥ इदंमहदैश्वर्ययस्यसर्वेवर्णाः
सर्वेप्याश्रमिणः शास्यपदेस्थिताः ॥ स्वाभिन्नैश्वर्य
इतिधातुर्नधनंब्रूतेकिंतुप्रभुत्वं ॥ तस्मात्स्वामिशब्दंप्र
युंजानाएकदंडिनिब्राह्मणतमेप्रभुत्वमंगीकुर्वत्यनुद्धताः॥
उद्धतास्तुयथेच्छंब्रुवते ॥ मातृमान्पितृमानाचार्यवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्वेदेतिवेदोश्रुतेस्वरहस्यं ॥ अतएवोद्धतत्वशांतौविश्वा
मित्रउवाच ॥ धिग्बलंक्षत्रियबलंब्रम्हतेजोबलंबलमि
ति ॥ ब्रम्हतेजसोलक्षणएकदंडेवेदसिद्धांतप्रतिपादि
निस्वामित्वमाचार्यत्वंचनिबद्धं ॥ तस्मादन्येषुस्वामि
शब्दआचार्यशब्दश्चप्रामादिकः ॥ तेषुसत्यापिब्राम्ह
णत्वेशास्यकोटिनिविष्टाएकदंडिनां ॥ तपूर्णब्राम्हण्यं
यदेषणात्रयत्यागेसत्याचार्यलक्षणसंपन्नत्वं ॥ यस्मा
न्नलोभसमानाधिकरणंब्राम्हण्यंकुतआचार्यत्वंप्रभुत्व
रूपं॥लोभोहिश्ववृतिंकारयति॥असंतुष्टाद्विजानष्टाइति
प्रवादः ॥ श्ववृत्तिरप्याचार्योपीत्युपहासः॥ शमोदमस्त
पः शौचंक्षांतिरार्जवमेवच ॥ ज्ञानंविज्ञानमास्तिक्यंब्र
म्हकर्मस्वभावजं ॥ शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यप
लायनं ॥ दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजं ॥
कृषिगोरक्ष्यवाणिज्यंवैश्यकर्मस्वभावजं ॥ परिचर्या
त्मकंकर्मशूद्रस्यापिस्वभावजमिति ॥ वर्णलक्षणा
निभगवदुक्तानि ॥ व्यत्यस्तानीमानिनफलायभवंती
त्याह ॥ स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरइति ॥
योनिनिमित्तेयंव्यवस्थेत्याहस्वभावजमिति ॥ भवत्य
स्मिन्निति भावोऽधिकरणेघञ्॥ स्वस्यभावउत्पत्तिस्था
नंतज्जं॥ अतएवगौडपादाचार्याव्यवस्थापयामासुःसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यासं ॥ विप्राणांविनयोह्येषशमप्राकृतउच्यते ॥ दमः प्रकृतिदांतत्वाद्विद्वानेवंशमंव्रजेदिति ॥ एषासंपत्ति ब्राह्मणानांयोनिमूला ॥ एतेचत्वारोऽपियोनिधर्मानगुणधर्माः ॥ अतएवतव्यत्यासंदृष्ट्वाशूद्रंतपश्चरंतंमारयामासरामचंद्रइतिरामायणोत्तरकांडेप्रसिद्धं ॥ किंच भवत्संमतेब्राम्हणत्वेसिद्धेतपःकिमर्थंचचार॥ तसेति तपसियोनिव्यत्यासासंभवात् ब्राह्मणशब्दएवलब्धः प्रवृत्तिनिमित्तहीनस्तस्मान्नविश्वामित्रस्यापिसंन्यासाधिकारः ॥ अतएवस्वस्यदीक्षासमयेयुद्धाधिकाराभावंनिमित्तीकृत्यदशरथंश्रीरामचंद्रोयाचितः क्षत्रियत्वाभावोननिमित्तीकृतः ॥ इच्छाचेद्विभर्तुंत्रिदंडमर्जुनवत्॥ ननुब्राम्हणशब्दःसंन्यासायोपयुज्येतचेत्किंदत्तंवसिष्टेन ॥ नतदाविश्वामित्रस्यसंन्यासप्रसंगः॥ जात्यंतरांगीकारोयोनिदूषणं ॥ तस्माद्ब्रम्हीभावाधिकारिणामेकदंडिनांब्राम्हणतमानामकिंकराणांश्रीजगद्गुरुभगवत्पादश्रीशंकराचार्यकिंकराणांस्वामित्व माचार्यत्वमव्याहतमितिविजयभेरीघोषः ॥ सिंहशिशुःसिंह एवभवतीतिन्यायात् ॥ तस्मान्नक्षत्रियाणामुपनिषदध्ययनाधिकारः ॥ श्रवणाधिकारोऽपिनास्ति ॥ सन्यस्यश्रवणंकुर्यादित्युपनिषत्सुश्रौतनियमात् ॥ भगवद्गी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताध्ययनाधिकारोऽवश्यंतदर्थत्वादुपनिषत्वेपि ॥ स्त्री-
शूद्रवैश्यानांनगीताध्ययनाऽधिकारोतदर्थत्वात् ॥ अ
लमतिपरीक्षायै ॥ इतिपंचमःपुलाकः ॥ ५ ॥ यदि-
क्षत्रियवैश्ययोर्ब्राह्मणत्वेनसंन्यासाधिकारेणतुष्टिःस्या
त्तदांगीकृतंदारिद्र्यं ॥ यदेवकेषांचिन्मंगलंतदेवेतरेषा
ममंगलं॥ यथाश्मश्रूणिपुरुषाणांमंगलंस्त्रीणाममंगलं
एषातुरीयमीमांसाकेनाचित्क्षत्रियेणवैश्येनवाबिरुदाव
लींदत्वाकारितेतिव्यज्यते॥ अभिनिवेशालिंगात् ॥ फ-
लध्वनिस्तुक्षत्रियाणां वैश्यानामितरगृहस्थानांचैषणा
त्यागपुरःसरंस्थातव्यमित्यनुज्ञानं ॥ समयवैचित्र्येणै
ष्यमाणस्यदौर्लभ्यादिति ॥ किमेतेदरिद्रेषुगण्येरन्नुत
सन्यासिषु ॥ सर्वेऽपिप्रैषमंत्रमुच्चरंतोऽभयंसर्वभूतेभ्य
इत्यभयंददानानाहुंकस्याचिन्नमेकाश्चिदितिसंन्यासस्व
रूपंजानंतोनिष्परिग्रहाएकाश्रम्यमंगीकुर्वंतः कथंनि
र्वाहयिष्यंतिगार्हस्थ्यंसंन्यासंवेतिप्रैषमंत्रोच्चारसमाना
धिकरणंगार्हस्थ्यंदारिद्र्यमितिफलनिर्देशः॥तेनयथाक
थंचिद्धनादिस्वामित्वमप्यपहारितं कुतोनिरुपपदस्वा
मिशब्दवाच्यत्वमित्युत्तरितः कथंसंन्यासिनांस्वामि
शब्दइत्युपहासः ॥ एतेनैकाश्रम्येणसर्वंसर्वात्मकंज
गदितिसिद्धांतःप्रतिपादितः ॥ सर्वेगृहस्थाः वानप्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थाब्रह्मचारिणः संन्यासिनश्चेति ॥ किंचदंडादिव्यव स्थांगीकारऐकाश्रम्यंव्याहतंतदंगीकारेदंडादिव्यवस्था व्याहताऽतऐकाश्रम्यमित्याचार्या इतिसूत्रस्याऽश्रम सांकर्यंनकुर्यादेकाश्रमेव्यक्तलिंगास्तिष्ठेदितिवाक्यार्थः संपन्नः ॥ तत्रदृष्टांतः प्रत्यक्षविधानाद्गार्हस्थ्यस्ये ति ॥ गार्हस्थ्यस्यश्रौतस्मार्तादिचिन्हैः प्रत्यक्षताविधानात्तथेतराश्रमेपीतिसूत्रार्थोऽन्यथामहर्षेरज्ञत्वकल्पनापत्तिः ॥ ननुक्षत्रियाणांत्रयआश्रमाइतिपक्षेपृथुपौत्रस्यसुशीलस्यगृहस्थाश्रमनिष्टस्य श्वेताश्वतरनामा मुनिः ॥ सान्यासिकंविधिंकृत्स्नंकारयित्वाविचक्षणः॥ ददौतदैश्वरंज्ञानंश्वशाखाविहितंव्रतं ॥ अशेषवेदसारं तत्पशुपाशविमोचनं ॥ अत्याश्रमइतिख्यातंब्रह्मादि भिरनुष्ठितं ॥ इतिसंन्यासंदत्तवान् ॥ तस्माद्भवन्मते गार्हस्थ्यसमानाधिकरणः संन्यासः सिद्धस्तस्मा दैकाश्रम्यंयुक्तं ॥ नचेच्चत्वारआश्रमाःक्षत्रियस्यसि द्धाइति चेत्॥न॥ मज्जेत्रयीदंडनीतौहतायांसर्वेधर्माःप्र क्षयेयुर्विबुद्धाः ॥ सर्वेधर्माश्चाश्रमाणांहताः स्युःक्षात्रे त्यक्तेराजधर्मेपुराणे इतिभवदुपन्यस्तवचनेनक्षात्रत्या गनिषेधात्तत्यागेविनासंन्यासानधिकारात् ॥ अतएवा स्यव्रतस्यात्याश्रमइतिनाम ॥ आश्रमानतिक्रम्यवर्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तइतितद्व्युत्पतेर्नेदंव्रतंसंन्यासाश्रमः किंतुसंन्याससद्दशं ॥ धैर्यवैराग्यदार्ढ्यदायकंरावणवधप्रसंगेऽगस्त्याद्रामंचद्रोलेभे ॥ उपमन्योश्चश्रीकृष्णः ॥ मज्जेतित्रयीतिश्लोकोघट्टकुट्यां प्रभातमितिन्यायमावेदयति ॥ अतएवेदंतारतम्यंसंगच्छते ॥ प्रव्रज्यावसितायत्त्रत्रयोवर्णाद्विजातयः ॥ निर्वासंकारयेद्विप्रंदास्यंक्षत्रियवैश्ययोरिति ॥ ब्राह्मणत्वक्षत्रियत्ववैश्यत्वानामनपगमादेषपंथाः ॥ प्रव्रज्याशब्दोवानप्रस्थसंन्यासान्यतरपरः ॥ अधिकारभेदेनफलभेदनिर्देशादिदंसर्वाश्रमाणामुपलक्षणं ॥ यदिक्षत्रियवैश्ययोर्ब्राह्मणत्वंतदानिर्वासनविषयता ॥ यदिनब्राह्मणत्वंतदाजितमस्माभिः ॥तस्मात् श्वेताश्वतरदत्तादीक्षाशांभवीषडध्वशोधनसंस्कारेणपशुपाशविमोचनी ॥ पाशविमोकेपिनाश्रमविमोकस्तस्मात्त्रिष्वप्याश्रमेषुसंभवत्येषादीक्षा ॥ भस्मरुद्राक्षधारणशिवपूजाषडक्षरजपप्रधाना॥नास्यांदीक्षायामग्निसमारोपस्ततोनाश्रमविमोकोनाश्रमांतरसंपादनं ॥ तस्मान्नैकाश्रम्यंक्षत्रियाणांनसंन्यासः सिद्धः ॥ इति षष्ठःपुलाकः ॥ ६ ॥ ॥ ननुऋणत्रयमपाकृत्यनिर्ममोनिरहंकृतिः ॥ ब्राह्मणःक्षत्रियोवाऽथवैश्योवाप्रव्रजेद्गृहात् ॥ अग्नीनात्मनिसंस्थाप्याद्वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जःप्रव्रजितोभवेत् ॥ इतिप्रव्रज्याविधानादिति चेद्धर्मा
द्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते इतिभगवद्वचनम
नुसृत्ययुद्धाधिकारमनपहायप्रव्रजेत्क्षत्रियइतिसिद्धेअ
ज्ञानात्मानिसंस्थाप्याद्विजः प्रव्रजितोभवेदित्यादिवचन
स्थद्विजशब्दोब्राह्मणएवश्रेयस्करः ॥ तस्मात्क्षत्रवैश्यौ
वनंगछेतांब्राह्मणःसंन्यसेदितिविशष्टवाक्यार्थः ॥ इ-
च्छाचेद्ब्राह्मणोऽपिवनंगच्छेत्संन्यसेद्वा ॥ वनंगतानां
व्यवस्थामाहयोगाभ्यासरतःशांतोब्रह्मविद्यापरायणः
एवंवनाश्रमेतिष्ठंस्तपसादग्धकिल्विषः ॥ चतुर्थमा
श्रमंगच्छेत्संन्यस्यविधिनाद्विजः ॥ ब्रह्मविद्याब्राह्मणा
नामुपनिषत्क्षत्रियाणांगीता ॥ तदभ्यासात्पक्वकषा
योब्राह्मणश्चतुर्थमाश्रमंगच्छेत्तस्मिन्नेवजन्मनिक्षत्रियो
जन्मांतरेततःप्रणाडयवैश्यः॥ब्राह्मणोब्रह्मविद्यांज्ञानशा
स्त्रमुपनिषदमधीयीतक्षत्रियोगीतांयोगशास्त्रंवैश्यःशां
तोभवेत्ब्रह्मविद्यानधिकारात् ॥ पुराणंवाशृणुयात् ॥
अतोवैश्यस्यद्वौफलदौ ॥ वैश्योवनंगतोऽपिनवानप्र
स्थः ॥ अनधिकाराद्वैराग्यमात्रपालनंनाश्रमांतरं ॥
वाक्यार्थज्ञानेयोग्यताज्ञानस्यकारणत्वात् ॥ तस्माद्ब्रा
ह्मणेविधिः ॥ क्षत्रियादौसंभावनालिङर्थः ॥ ननुसव
र्णसाधारणोऽयंद्विजशब्दः ॥ यथावाक्यांतरं ॥ नजा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिर्नकुलंराजन्नस्वाध्यायःश्रुतंनच ॥ कारणानिद्विज त्वस्यवृत्तमेवहिकारणमितिवृत्तमूलंद्विजत्वमुपयुज्येत संन्यासेक्षत्रियादौ ॥ अतएवाग्रेचतुर्वेदोपिदुर्वृत्तःशूद्रा दल्पतरः स्मृतः ॥ तस्माद्विद्धिमहाराजवृत्तंब्राह्मणल क्षणमिति ॥ युक्तमुपन्यस्तं ॥ एतदेववचनंपुरस्कृत्य रामावतारसमयेएकःशूद्रस्तपश्चचारतेनापराधेनकस्य चिद्ब्राम्हणस्यपुत्रोमृतः ॥ अधुनातुतादृशाब्राम्हणा बहवोजातास्तस्मादेवैषमृत्यूत्पातःप्लेगनामा ॥ किंच किमनेनवचनेनदुर्वृत्तत्वंनिषिध्यतेऽथवाजातिस्वाध्या- यश्रुतानिपर्युदस्यवृत्तमभिलक्ष्यब्राम्हणत्वंविधीयते ॥ आद्येजातिस्वाध्यायश्रुतसमानाधिकरणंसद्वृत्तमपेक्ष्य तेब्राम्हणत्वायेतिनतवमनोरथसिद्धिः ॥ द्वितीयेजा त्यादिव्यधिकरणंवृत्तंवर्णसंकरेपितस्यब्राम्हणत्वापत्तिः यद्यभीष्टंतदापरीक्षितंतवैवब्राम्हणत्वं ॥ श्रीरामचंद्रे णभवत्समंतशूद्रब्राम्हणोहतोवृत्तसंपन्नोपि ॥ दुर्वृत्तो जातिब्राम्हणोपिरावणोहतः ॥ किमत्रन्याय्यं ॥ वृत्त मन्विष्यतांतातरक्षोभिः किंनपठ्यते ॥ बहुनाकिम धीतेननटस्येवंदुरात्मनः ॥ रक्षसादुर्वृतेनपठितंवधाय नपरिपंथि ॥ शूद्रेणाधीतंतपश्चरितंचतथानप्रतिबंधु मीष्टेवधं ॥ कस्मात् ॥ तेनाधीतंश्रुतंवापियः क्रिया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनुतिष्ठतीतिद्वयोर्वधहेतुरुपन्यस्तः ॥ यस्मात्क्रियावर्णाश्रमनिबद्धास्तस्मादेकाश्रमिणोनटशूद्रस्याश्रमांतराऽभिनयोपराधः ॥ जातिब्राम्हणस्यापिरावणस्यपरस्त्रीकामनाद्यपराधः ॥ तस्मात्द्वावपिदुर्वृत्तौ ॥ अत एवकपालस्थंयथातोयंश्वदृतौचयथापयः ॥ दूष्यंस्यात्स्थानदोषेणवृत्तहीनंतथाश्रुतं ॥ जातिशूद्रत्वमतिकामित्वंक्रूरत्वंचस्थानदोषः ॥ इतिन्याय्यं ॥ इ तोबहिर्धावनंसर्वतंत्रस्वतंत्रत्वं ॥शास्त्रपराधीनत्वंयेषांविरुद्धं॥ तस्माज्जातिब्राम्हणएवब्राम्हणशब्दार्थः ॥ गुणतः संन्याससमर्पणंश्वदृतौगोक्षीरसमर्पणमितिविदांकुर्वंतुमहामहोपाध्यायाः ॥तस्मात्॥सत्यंज्ञानंक्षमाशीलमानृशंस्यंतपोघृणा ॥ दृश्यंतेयत्रराजेंद्रसब्राह्मणइतिस्मृतइतियुधिष्ठिरवचनंजातिब्राम्हणस्यलक्षणमावेदयतिनलक्षणप्राधान्येनब्राम्हण्यंविधत्तेऽनुपदमुपन्यस्तदृष्टांतावष्टंभात् ॥ अग्निपुराणंभवदुपन्यस्तंमहावष्टंभः ॥ ननुसुरेश्वराचार्यामन्यंतेत्रैवर्णिकानांसंन्यासं ॥यथा॥ ब्राम्हणग्रहणंचात्रद्विजानामुपलक्षणं ॥ अविशिष्टाधिकारित्वात्सर्वेषामात्मबोधने॥ त्रयाणामविशेषेणसंन्यासःश्रूयतेश्रुतौ ॥ यदोपलक्षणार्थंस्यात्ब्राम्हणग्रहणंतदेतित्रैवर्णिकसंन्यासोपष्टंभइतिचेन्नायमुपष्टंभःकिं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्ववष्टंभः ॥ कुत्रश्रुतौक्षत्रियवैश्यावुद्दिश्यसंन्यासोवि
हितोयथाब्राम्हणाःप्रव्रजंतीति ॥ नकुत्रचिच्छ्रूतेक्ष
त्रियाःप्रव्रजंतीतिवैश्याःप्रव्रजंतीति ॥ तस्माद्द्विजा
नामुपलक्षणमित्यस्यानुपनीतानांसत्यपिजातिब्राम्ह
णत्वेनसंन्यासाधिकारइत्यर्थः ॥ उपनीतानांत्रयाणांब्र
म्हचारिगृहस्थवानप्रस्थानामविशेषेणगृहाद्वनाद्वाप्रव्र
जेत् ॥ ब्रम्हचर्यादेववेतिसंन्यासाधिकारबोधनात् ॥
नतत्रद्वितीयमायुषोभागमुषित्वातुगृहेद्विजः ॥ तृतीय
मायुषोभागंगृहमेधीवनेवसेत् ॥ उत्पाद्यधर्मतःपुत्रा
निष्ट्वायज्ञैश्वशक्तितः ॥ दृष्ट्वाऽपत्यस्यचापत्यंब्राम्हणो
रण्यमाविशेत् ॥ इतियमस्मृतिःप्रतिबंधिका॥यदहरेव
विरजेत्तदहरेवप्रव्रजेदितिश्रुतेर्बलवत्वात् ॥ तस्मात्सं
न्यासउपनयनमपेक्षतेनगार्हस्थ्यंवानप्रस्थ्यंवेतिवार्ति
कार्थोवेदितव्यः ॥तस्मात्क्षत्रियसंन्यासवाक्यानिनिर्मू
लानि ॥ मूलश्रुतेरनुपलंभान्निषेधोपलंभाच्च ॥ ध
र्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनाविद्यतइतिवचनंवि-
दितंमंडनमिश्रैरापि॥एतेनमुखजानामयंधर्मोयद्विष्णो
र्लिंगधारणं ॥ बाहुजातोरुजातानांनायंधर्मोविधीय
ते इतिनिषेधशास्त्रमंगीकुर्वाणैरनुग्रहःकृतोलिंगधारणं
विनाक्षत्रविशोस्त्यागाधिकारोदत्तोलिंगस्याश्रमनिमि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तत्वात् ॥ सत्यपित्यागाधिकारेनसंन्यासाश्रमाधि
कारइतितात्पर्यात् ॥ तथाचभगवानाहक्षत्रियं ॥
कर्मण्येवाधिकारस्तेमाफलेषुकदाचन ॥ माकर्म
फलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ॥ अकर्मणिसंन्यासे
संगोमास्तुकर्मफलेच्छाचमास्तु ॥ यस्मात्ते क्षत्रि
यस्यकर्मण्येवाधिकारः ॥ तत्फलेनाधिकारोविरक्त
त्वात्तव ॥ एषएवक्षत्रियाणांसंन्यासः ॥ यदहरेववि
रजेत्तदहरेवप्रव्रजेदितितुब्राह्मणजातिविषयाश्रुतिः ॥
ब्राम्हणाःप्रव्रजंतीतिवाक्यशेषात् ॥ तस्माद्गीतायां
फलत्यागपराणिवचनानिक्षत्रियाविषयाणि ॥ तस्मात्
यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्य
सिकौंतेयतत्कुरुष्वमदर्पणमितिकर्माधिकारित्वात्तवम
यिकर्मसमृद्धयेकर्मार्पणंयुक्तं ॥ क्षेत्रेव्युप्तमनंतंभवती
तिन्यायेनतद्भोगायजन्मांतराण्यंगीकृतानिगुरुशिष्या
भ्यामवश्यं ॥ तस्मात्संन्यासएवमोक्षहेतुर्नफलार्पणं
कर्मार्पणंवा ॥ तंचजातिब्राम्हणएवाऽधिकरोतित्रिदंड
मेकदंडंवा ॥ ननुकाम्यानांकर्मणांन्यासंसंन्यासंकवयो
विदु रितिकाम्यकर्मत्यागीक्षात्रियादिः संन्यासशब्दमर्ह
तीतिचेन्न्यासेसंन्यासशब्दऔपचारिकइतिसमोर्थः ॥
किंचकाम्यकर्मणामस्त्रप्रयोगाणांत्यागेक्षात्रंत्यक्तं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तच्चनिषिद्धं ॥ अस्यापिसंन्यासशब्दस्यब्राम्हणएवविषयः॥कर्ममात्रस्यकाममूलत्वात्॥जायमानोवैब्राम्हणस्त्रिभिर्ऋणवाजायत इतिश्रुत्यान्यत्रापाकरणसामग्रीन्यूनतेतिध्वनितं ॥ ॥ विरक्तमपिक्षत्रियंयोधयेदितिगीतार्थेप्रस्फुटेसत्यपिसंन्यासये दितिकैषावाचोयुक्तिः ॥ संन्यासःक्षत्रियाणांक्लैब्यंब्राम्हणानांपुमर्थहेतुः ॥ रणमरणंक्षत्रियाणांसंन्यासोब्राम्हणानामापद्धर्मइतिशास्त्रपरिशुद्धिरित्युलं ॥ विट्तुतिष्टतुबहिःकोणेब्राह्मणानां ॥ क्षत्रियांतरितत्वात् ॥ अस्तुगुणतोवर्णव्यवस्था ॥ नजगद्गुरोःशंकरस्यहानिस्तेषामपिवर्णानांतर्च्छास्यत्वाव्यभिचारात्॥परंतुजातिब्राह्मणानांभृतकजीविनांसत्यशूद्रत्वमापद्येततथामाभूदितिशिवं ॥ स्थितस्यगतिश्चिंतनीयेतिमिश्रैः क्षत्रियाणांसंन्यासोगतिश्चितितः क्षात्रत्यागनिषेधश्चांगीकृत इतिमिथोव्याहतिः ॥ कंपक्षमंगीकुर्वंतिक्षत्रियाःपश्यंतुमिश्राः ॥ इतिसप्तमःपुलाकः ॥ ॥ ७ ॥

गीताशास्त्रमधीयानोवर्णसंकरकारणं ॥ इतिचित्रंहरौगीतांव्यवस्थार्थंब्रुवत्यपि ॥ नैकःपुलाकोयत्रास्तिरसपाकसमन्वितः ॥ सास्थालीतुर्यमीमांसाकीर्तिमृद्धिंकथंदिशेत् ॥ २ ॥ यस्मैयस्मैददासित्वमधिकारमसांप्रतं ॥ तस्यतस्यपदेनूनंभूदेवोऽपिनमस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति ॥ ३ ॥ चत्वारोऽपिचरत्नानिवर्णाइतिजनेषुये ॥ नसांकार्यतत्रयोग्यंरत्नत्वंव्याहतंभवेत् ॥ ब्राह्मणानर्ह यत्कालेक्षेत्रियान्योधयेदपि ॥ व्यापारयेच्चवणिजोदा सयेच्छूद्रनायकान् ॥ ५ ॥ संप्रदायाचार्याचित्ताभि प्रायःपंडितेनचेत् ॥ विज्ञातःस्यात्तदालेखमन्यमेवक रिष्यति ॥ ६ ॥ शास्त्रंव्यवस्थासंसिध्यैनोत्पातायेति सांप्रतं ॥ अन्यथाशास्त्रतातस्यकथंज्ञेयंविचार्यतां ॥ ७ ॥ ज्ञातव्यमधुनासम्यग्वर्णानांब्राह्मणोगुरुः ॥ गुरुस्तस्यतुसंन्यासीसएवतुजगद्गुरुः ॥ ८ ॥ व्रीहयोगु णहीनाश्चेद्वोधूमागुणशालिनः॥ अवघाताख्यसंस्का रोगोधूमानांग्रहोनहि ॥ ९ ॥ किंबहुना ॥ इच्छाद्वेष समुत्थेनद्वंद्वमोहेनभारत ॥ सर्वभूतानिसंमोहंसर्गेयां तिपरंतपेतिभगवद्वचःसत्यं ॥ तस्मात् ॥ ननुकृष्णो भोगीशुकस्त्यागीनृपौजनकराघवौ ॥ वसिष्ठःकर्मक र्ताचपंचैतेज्ञानिनःसमाइतिनसंन्यासावश्यकतेतिचेद्व क्तव्यंकिमेषांसमाप्रतिष्टोततारतम्येन ॥ यदितारत म्यंतदाजितंशुकेनात्रपरिक्षितसभासाक्षिणी ॥ कस्तु ष्टःकिंदद्यादितियदिचेतसितदैवतस्यवचः॥मन्यंतेस्वेच परेस्वामित्वंतस्यमार्गतःप्राप्तं॥१०॥ इदंब्राह्मणसर्वस्वं कृष्णानंदेननिर्मितं ॥ येनवर्णाः स्वस्वमार्गेतिष्ठंत्वा स्थावशंवदाः ॥ ११ ॥ यःशंकरःसकलवेदरहस्यव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्तावुद्धादिबुत्थितमसांखलुचंडभानुः ॥ अभ्युद्दधार विगलच्छ्रुतिमार्गमद्धाभूमंडलेविजयतेयतिसार्वभौमः ॥ १२ ॥ क्षत्रियाणांपंडितानांपरीक्षार्थंकृताकिमु ॥ मिश्रेणतुर्यमीमांसास्वस्त्यस्तुविदुषेऽसदा ॥ १२ ॥ इतिश्रीकैवल्यनाथचरणपरायणश्रीकैवल्यधामनिवासिकृष्णानंदसरस्वतीकृतंब्राह्मणसर्वस्वंनामतुर्यमीमांसास्थालीपुलाकपरामर्शः ॥ जयसच्चिदानंदगोविंद शके १८२४ वैशाखवदीगु० १४

श्रीगणेशायनमः ॥ जयसच्चिदानंद ॥ श्रीजगद्गुरवेब्रह्मविद्याधीश्वरायसिद्धेश्वरायतरुणायव्यूढोरस्कायानुच्चायापिजगदुच्चायबृहच्छीर्षायकौपीनमात्रपरिधानायविशालनयनायास्मितवदनाय रुचिरकांतयेजगद्दत्तशांतयेकृपापांगायकरुणामूर्तयेदीर्घभ्रूलताय विशालभालायप्रकटितश्रुतिरहस्यायसर्वज्ञायश्री शंकरायनमः ॥ आचार्यशंकरवचांसिसरांसिनूनंहंसावलीपरिचितानिसमास्पदानि ॥ मुक्तान्वितानिमधुराणिमनोहराणिसंफुल्लवेदवचनाब्जरसांचितानि १ गांभीर्यखर्वितसरित्पतिगर्वितानियत्पातिमानुषसमुद्धरणक्षमाणि॥यत्पारदृष्टिचकितावरकद्विजानिमाधूकरैकशरणानिकृतानृणानि २ यत्त्यागिनांफलमिदंतुशरीरदाहोमृत्स्नांकितश्चमहतामपिभालपट्टः ॥शास्त्रोदितेऽपिसहजेऽपिसतिद्विजत्वेदासाभिधाचपशुताचनृणांविडंबः३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्तीरवासिजनताजनतापहंत्रीगंत्रीचयत्परपदंतमसः परस्तात् ॥ मंदारमालिततरंगितगांगतीरंप्राप्ताअपिप्रतिदिनंपरियंतितानि ॥ ४ ॥ यत्राप्लुताःसकृदपिब्रुवतेमनुष्याब्रह्माहमस्मिशिवमस्मिपराचिदस्मि ॥ दासोहमस्मिभवसागरलुंठितोऽस्मीत्येवंवदंतितदलाभपथाधिरूढाः ॥ ५ ॥ आज्ञाहितत्रजगदस्तिचयत्रगेहेहित्वाजगद्गुरुगृहेपरमेशवासः ॥ तस्मान्नतत्रविधिवाक्यनिषेधवाक्येअद्वैतचंडमिहिरःसरसांतटेषु ॥ ६ ॥ यद्गाहनेनलभतेपरमार्तिशांतिर्चिंतामणिंसुखतरं परमात्मतत्वं ॥ भूमाख्यमद्वयमखंडममूलमूलंनिष्किंचनोपिसुरराजकरार्चितांघ्रिः ७ यत्रोत्थतत्वमसिपद्मरसादनेनसंस्पर्धतेखलुनरोमधुसूदनेन ॥ कृष्णोऽस्मिवृष्णितिलकोऽस्मिरमापतिश्चत्वं चाहमस्मिवदतिप्रतितंपुरस्तात् ८ श्रीशंकरेणविजितानिसदांसिसर्वाण्याकारिभूरिभुवनेश्रुतिभिर्वसंतः ॥ संपुष्पितेफलभरेश्रुतिकाननेऽस्मिन्कृष्णोयतिर्वसतियत्रमिलंतिसंतः ९ कौपीनपरिधानःसन्जिगायजगदर्भकः ॥ सशंकरोजगज्जेतागुरुरेकोमहीतले १० बालेनविजितंविश्वंबालेनगिरिरुद्धृतः ॥ लोकोत्तराविमौमन्येकृष्णःशंकरभारती ११ श्री इति श्री कै० कृष्णानंदसरस्वती विरचितं श्रीजगद्गुरुसत्यस्वरूपस्तोत्रंसंपूर्णं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri